तस्यापत्यमित्यधिकारे विहिते प्रत्यये । "आपत्यस्य च तद्धितेऽनाति" पा० ।

**आपथि** पु० अभिमुखः पन्थाः यस्य वेदे नि० इत् समा० । अभिमुखमार्गसम्बन्धिनि "आपथयोविपथयोऽन्तस्पथा अनुपथाः" ऋ० ५,५२ १० । आपथयः अभिमुखा मार्गा येषां तादृशाः" भा० स्त्रियां वा ङीप् "हिरण्ययेभिः पविभिः पयोवृधः उज्जिघ्नन्त आपथ्यो न पर्व्वतान्" ऋ० १, १६४ ११ ।

**आपद्** स्त्री आ+पद–सम्पदा० क्विप् । विपत्तौ आपत्तिशब्दे विवृतिः" दैवीनां मानुषीणाञ्च प्रतिहर्त्ता त्वमापदाम्" रघुः । "सम्पदो मे निरापदः" रघुः "अविवेकः परमापदां पदम्" किरा० "मन्त्रशक्तिविनिवारितापदः" माघः । "आपत्कल्पः आपत्कालः । आपत्प्राप्तः । आपद्गतः । आपद्ग्रस्तः । आपद्धर्मः" हलन्तत्वाद्वा टाप् । आपदाप्यत्र । आपत्काले न्यूनादपि विद्याधिगन्तव्या यथा छा० उ० "वाचा स्म वै पूर्व्व उपयन्ति सहोपायनकीर्त्त्योवास" अत्र भाष्यम् "वाचा स्म किल पूर्व्वे ब्राह्मणाः विद्यार्थिनः सन्तः क्षत्रियान् वैश्यान् वा क्षत्रिया वैश्यानुपयन्ति शिष्यवृत्त्या उपगच्छन्ति नोपायनशुश्रूषाभिः अतः स गौतम उपायनकीर्त्त्या उपगमनकीर्त्तनमात्रेणैव उवास ऋषिवान् नोपायनं चकार"। "आपदि समादधिकाद्वा विद्याप्राप्त्यसम्भवावस्थायाम् उपायनमुपगमनं पादोपसर्पणम्" आन० ।

**आपद्काल** पु० आपदा क्वतोऽकालः । आपदा क्वते दुष्टे काले "पीड़ा चापद्कालस्य पत्तिज्ञानञ्च पाण्डव !" भा० शा० प० ५८ अ० ।

**आपदेव** पु० आपस्य जलसमूहस्य देवः । वरुणे ।

**आपद्धर्म** पु० आपदि कर्त्तव्यो धर्म्मः । १आपद्यनुष्ठेये धर्म्मे आपद्धर्म्ममधिकृत्य कृतोग्रन्थः अण् । भारतान्तर्गतशान्तिपर्वमध्यगते व्यासकृते २अवान्तरपर्वभेदे न० तच्च भा० शा० प० १२१ अध्यायावधि १७२अध्यायपर्य्यन्तम् ।

**आपन** न० आप+भावे ल्युट् । १प्राप्तौ । कर्मणि ल्युट् । २मरीचे शब्दच० । [मणौ २किराते च उज्ज्वलदत्तः ।

**आपनिक** त्रि० आ+पन–स्तुतौ कर्मणि इकन् । १इन्द्रनीले

**आपनेय** त्रि० आ+अप+नी–कर्मणि यत् । समन्तादपनेये दूरीकार्य्ये "नैषा तर्केण मतिरापनेया प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठ !" कठोप० । "येयमागमप्रतिपाद्यात्मनि मतिः नैषा तर्केण स्वबुद्ध्यभ्यूहमात्रेण नापनेया नापनेतव्या न हन्तव्या । तार्किकोह्यनागमज्ञः स्वबुद्धिपरिकल्पितं यत्किञ्चिदेव कथयति अतएवच येयमागमप्रसूता मतिः तार्किकादन्येनैवागमाभिज्ञेनाचार्य्येणैव प्रोक्ता सती सुज्ञानाय भवति" भा० ।

**आपन्न** आ+पद–क्त । २आपद्ग्रस्ते "आपन्नः संसृतिं घोरां यन्नाम विवशोगृणन् । ततः सद्योविमुच्येत यद्बिभेति स्वयं भयम्" भाग० "आपन्नाभयसत्रेषु दीक्षिताः खलु पौरवाः" शकु० "आत्मापराधादापन्नस्तत् किं भीमं जिघांससि" भा० स्त्री० प० १२अ० १प्राप्ते मेदि० आपन्नसत्वा

**आपन्नसत्वा** स्त्री आपन्नं प्राप्तं गर्भरूपेण सत्वं प्राणी यया । गर्भिण्यां स्त्रियाम् "सममापन्नसत्वास्ता रेजुरापाण्डुरत्विषः" रघुः । [निमयं दत्त्वा क्रीते ।

**आपमित्यक** त्रि० अपमित्य परिवर्त्त्य निर्वृत्तम् कक् । वि-

**आपया** स्त्री आपेन जलपूरेण याति या+क । १जलपूरवाहि नदीभेदे "दृषद्वत्यां मानुष आपयायां सरस्वत्यां रेवदग्ने दिदीहि" ऋ० ३,२३,४, । "आपया नाम काचित् नदी" भा० २आपगारूपनदीमात्रे च ।

**आपयितृ** त्रि० आप+णिच्–तृच् । प्रापयितरि "आपयिता ह वै कामानां भवति यएवं विद्वानक्षरमुद्गीथमुपास्ते" छा० उ० । "आपयिता ह वै कामानां यजमानस्य भवति" भा० । स्त्रियां ङीप् ।

**आपराधय्य** न० अप+राध–णिच् बा० य तस्य भावः ब्राह्म० ष्यञ् । अपराधकर्तृत्वे ।

**आपराह्णिक** त्रि० अपराह्णे भवः ठञ् । १अपराह्णभवे २तद्व्यापके च स्त्रियां ङीप् । "पितृर्थे चापराह्णिकी" स्मृतिः ।

**आपर्त्तुक** पु० ऋतुमधिकृत्य अध्यायः तत्र विहितः कल्पः । ऋतावध्यायबोधके छान्दसे कल्पग्रन्थभेदे । "ऋतावध्यायश्छान्दसः कल्प आपर्त्तुकः" कौशीतकिसूत्रम् ।

**आपव** पु० आपुनाति स्पर्शमात्रेण आपु जलं तदधिष्ठाता वरुणोऽपि आपूः तस्यापत्यम् । कल्पभेदे वरुणस्यापत्ये १वशिष्ठे मुनौ तस्य तत उत्पत्तिकथा यथा भा० आ० प० ९९ अ० "यं लेभे वरुणः पुत्रं पुरा भरतसत्तम ! वशिष्ठनामा स मुनिः ख्यात आपव इत्युत" "तत्ते शापाद्विनिर्मुक्ता आपवस्य महात्मनः" इति च आपगेयशब्दे विवृतिः । आपं जलपूरं वाति प्राप्नोति आश्रयत्वेन वा–क । २नारायणे परमपुरुषे । "आपोनारा इति प्रोक्ताः आपोवै नरसूनवः । अयनं तस्य ताः पूर्व्वं तेन नारा-